International Journal of Applied Research 2018; 4(3): 140-142




**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2018; 4(3): 140-142
www.allresearchjournal.com
Received: 22-01-2018
Accepted: 24-02-2018

**डॉ. सुवल चन्द्र साहु**
व्याकरणविभाग: सरकारीडिग्री संस्कृतमहाविद्यालय: वारिपदा, ओडिशा, भारत

**Correspondence**
**डॉ. सुवल चन्द्र साहु**
व्याकरणविभाग: सरकारीडिग्री संस्कृतमहाविद्यालय: वारिपदा, ओडिशा, भारत

# षष्ठीस्थानेयोगा इति सूत्रस्य प्रख्यापनम्

**डॉ. सुवल चन्द्र साहु**

**१-उपोद्घात:-**

संस्कृतं नाम दैवीवाक् अन्वाख्याता महर्षिभि:-इति वचनसामर्थ्यात् सर्वभाषानिदानं सर्वोपकारकं पदसाधुत्वलक्षणं व्यारकरणमिति हितो निगद्यते श्रीमता भर्तुहरिणा-

न सोऽस्ति प्रत्यय: लोके य: शव्दानुगमादृते।
अनुविद्धमिवज्ञानं सर्वंशब्देन भासते।

महामुनिपाणिनि: स्वतपप्रभावप्रसन्नेन्दुमौलिप्रसादधिगतवर्णसमाम्नायमुपजीव्यअष्टाध्यायी-व्याकरणं प्रणीतवान्। यदुत्तरकाले कात्यायनमुनिना वार्त्तिकेन पल्लवितम् तथा महर्षिपतञ्जलिना महाभाष्येन समुपवृहितम्। सर्वेष्वपि व्याकरणेषु प्रातिशाख्येषु पाणिनिव्याकरणस्यैव प्राधान्यं विद्वद्भि: स्वीकृतम्। तथाहि महाभाष्ये-सर्ववेदपारिषदं हीदं शास्त्रम्। शास्त्रप्रक्रियानिर्वाहार्थं प्रकृतिप्रत्ययविभागकल्पनार्थं लौकिकानां वैदिकानां च शव्दानामनुशासनार्थं पाणिनिव्याकरणस्यैव वेदाङ्गत्त्वम्। यथाहि महाभाष्ये-ब्राह्मणस्य निष्कारणो धर्मो षडङ्गवेदोऽध्येयोज्ञयश्च। शिक्षा-कल्प-छन्द-ज्योतिष-निरुक्त-व्याकरणोति षडङ्गेषु प्रधानं तावत् व्याकरणम्। प्रधाने च कृतो यत्नो फलवान् भवति लोके। ऋग्वेदे- सत्कुमिव तितउना पुनन्तो यत्र धीरा:मनसा वाचमक्रत। असाधुशव्देभ्य: विविच्य साधुशब्दवोधाय व्याकरणमेव प्रमुख साधनमनन्ति सर्बे शाव्दिका:।

व्याकरणमित्युक्ते व्याक्रियन्ते व्युत्पाद्यन्ते प्रकृति प्रत्ययादिभि: निष्पाद्यन्ते साधव: शव्दा: अनेनेति व्याकरणम्। तत्र धर्मस्वरुपज्ञानाय मीमांसाशास्त्रम्, प्रमाणस्वरुप वोधाय न्यायशास्त्रम् तथा च पदस्वरुपज्ञानाय व्याकरणमिति वैयाकरणानां सुचिचिन्तितमतम्। पाणिनिप्रणीताष्टाध्यायीव्याकरणस्यरचनावैशिष्टयमत्यद्भूतम्। संज्ञा-परिभाषा-विधि-नियम-अतिदेशोऽधिकारेति षडविधसूत्रेषु “षष्ठी स्थाने योगा”- इति वक्ष्यमाणसूत्रं परिभाषासूत्रत्त्वेन प्रतिपादितम्। अल्पाक्षरमसन्दिग्धं सारवत् विश्वतो मुखम्-इति न्यायानुरुधेन स्वल्पाक्षरविशिष्टे “षष्ठी स्थाने योगा” इति परिभाषा सूत्रे महत् वैशिष्टयं सारवत्ता च समुपपादितंसूत्रकारेण इति।

**२- सूत्रस्य प्राग् विमर्श:**

अनिर्द्धारितसम्वन्धविशेषा षष्ठी स्थाने वोध्या इत्यभिप्रायमाधारीकृत्य उच्चते स्थानं नाम प्रसङ्ग:। तस्मिन् स्थाने वाचकतया योग: यस्या: सा स्थाने योगा। निपातनात् सप्तम्या अलुक्। स्थानेनयोग:यस्या:इतिबाबिग्रह:।

इको यणचि इत्यादौ षष्ठी स्थाने रुप सम्बन्धार्थिका। लोके तावत् एकशतं षष्ठयर्था शब्दस्य शब्देन सह त्रय एव सम्वन्ध प्रमुखतया विद्यन्ते। यथा-१-आनन्तर्य्यम्। २-सामीप्यम्। ३-प्रसङ्ग। तत्र अन्यतम अर्थ निर्धारणार्थमिदं सूत्रमावश्वकमिति भाष्यम्। ततश्च “इको यणचि”-इत्यादौ इक् इति षष्ठया स्थानमुच्यते। तस्मिन् प्रकृत्यर्थ इक् निरुपकतया अन्वेति। अचि परत इक् प्रसङ्ग यण् स्यात् इति सूत्रस्यास्यप्रमुखअभिप्राय:।

**३- सूत्रसमीक्षा**

अनिर्द्धरित सम्बन्धबिशेषा षष्ठी स्थाने योग बोध्या इति सूत्रार्थ:। तथा च अस्तेर्भु: -अत्र अस्ते स्थाने प्रसङ्ग इति अस्ते या क्रिया स्वार्थप्रतिपादनलक्षण, तस्य निमित्तभुतस्य कालस्य अवसर प्राप्त इत्यर्थ इति काशिका बृत्तौ न्यास व्याख्याने व्याख्यातम्।

यद्यपि षष्ठीस्थाने योगा एब इति अस्या बचनब्यक्तौ यत एबकार तत अन्यत्र अवधारणमिति षष्ठी नियम श्रुत्या प्रतीयते, तथापि स्थान निमित्तक एव सम्वन्ध षष्ठया वाच्य। अत परिभाषायां योग नियमार्था। इह शास्त्रे या षष्ठी अन्य योग श्रुयते, स्थाने योगा एव भवति। नान्य न्योग। स्थानं शब्दस्य प्रसङ्गवाची। यथा-दर्भाणां स्थाने शरै प्रस्तरितब्यम्। दर्भाणां प्रसङ्ग इति गम्यते। एबं इहापि अस्ते स्थाने-प्रसङ्ग भुर्भवति इतिकाशिका बृत्तौ पदमंजरी व्याख्याने पर्य्यालोचितम्।

**४- भाष्यदिशा सूत्रोपन्यास:**

अनिर्धारित सम्बन्धविशेषा षष्ठी स्थाने योगा इत्यर्थप्रतिपादनाय सूत्रमिदमुपन्यस्तम्। भाष्ये शङ्का जागर्त्ति-किमिदं स्थाने योगा इति? अत्र स्थाने योग: यस्या सा स्थाने योग इति वहुव्रीहि:समास: संजात:। अत्र निपातनात् सप्रमी विभक्ते: लोप: न भवति। अथवा अत्र स्थाने योग: यस्या: स स्थाने योगा इति तृतीया पूर्व पदपरकबहुव्रीहि: समास: भवति। सूत्रमिदं किमर्थमिति शंकायामुच्यते यत्- षष्ठी स्थाने योगा वचनं नियमार्थम्। अर्थात् नियमार्थं सुत्रमिदमारव्धम्। एकशतं षष्ठयर्था ततोऽधिकयावान्तो वा अर्था: सन्ति सर्बे अर्था: षष्ठी उच्चारणद्वारा वोध्यन्ते। व्याकरणे या षष्ठी तस्या: स्थानसहितं सम्बन्धो विद्यते। एतत् यत्नं विना न सिद्धयति। अत: स्थाने योगा इति वचनं नियमार्थं प्रतिपादितम्।

सूत्रस्यास्य प्रयोजनं विद्यते। तथाहि वार्त्तिकमुपस्थापितम्- "अवयवषष्ठयादिष्वतिप्रसङ्ग शासो गोह:" इति- अर्थात् "शासो इदङ हलो:" तथा "उदूपधाया गोह:" इति सूत्रे प्राप्त अवयव षष्ठीषु स्थानसम्वन्ध: प्राप्नोति। अत: शास इति या षष्ठी सा अवयव षष्ठी। अत्रापि स्थानेयोगा सती शास स्थाने तथा उपधाया: स्थाने इकार: प्रान्पोति। तथा च "उद्पधाया गोह:" अत्रापि गोह स्थाने तथा कस्यापि उपधाया: स्थाने ऊकार: प्राप्नोति। शास गोह इत्यादि अवयवषष्ठीषु असन्देहत्वात् स्थाने योगा इति नियमस्य अप्रबृत्ति:। तथाहि वार्त्तिकं-अवयब षष्ठयादीनां चाप्राप्तियोगस्यासन्दिग्धत्वात्त्। यत्र यत्र सन्देह: संजायते तत्रैव षष्ठी स्थाने योगा इति नियम: प्रवर्तते। सन्देहे नियम: जायते इतिवचने न काचित् आवश्यकता। यत: अनुच्यमानेऽपि तत् वोध्यते। यथा लौकिक दृष्टान्तमुपस्थाप्य भाष्यकार: कथयति- यथा लोके कश्चित् अपरं पृछति- ग्रामान्तरं गमिष्यामि पन्थानं मे उपदिशतु। तत: स आह अमुस्मिन् अवकाशे हस्तवाम इति। यस्तत्र तिर्यक पथ: भवति न तस्मिन् सन्देह इति कृत्वा न सोऽपि उपदिशति। अत्रापि सन्हेहे नियम भविष्यति। अवयव षष्ठयादिषु सन्देह अभावात् न नियम: विधातव्य:।

अथवा स्थाने अयोगा इति अयोगा पदस्य प्रश्लेषं कृत्वा स्थाने अयोगा-स्थाने योगा इति वोध्यम्। तत्र वार्त्तिकम्-विशिष्टा वा षष्ठीस्थाने योगा इति। अर्थात् कस्यापि विशेषसंकेतविशिष्टा षष्ठी एब स्थाने योगा मन्यते। तस्यापि "शासो इदङ हलो:" अत्र शास स्थानषष्ठी अकरणे शाहौ इति उत्तर सुत्रेऽपि अनुवृत्त शास इत्यत्र स्थानषष्ठी नभविष्यति। तर्हि तत्र स्थानषष्ठीकरणार्थं पृथक् शास् ग्रहणं करणीयम्।

भाष्ये तावत् प्रतिपाद्यते यत् "शाहौ" इत्यत्र स्थानषष्ठीनिमित्तं पृथक् शास ग्रहणमनावश्यकम्। "शास इदड हलो:" इत्यनेनैनो शास अनुवर्त्तनं करिष्याम:। शास एतत् अवयव षष्ठी सत्यपि शाहौ इत्यत्र अनुवृत्त सन् स्थानषष्ठी भविष्यति। अत्र कथमिति प्रश्न जन्जन्यते। तत्र उत्तरितम्- अधिकारो नाम त्रिविधम्। १- कश्चित् एकदेशस्थ सर्वं शास्त्रं अभिग्वलयति- यथा प्रदीप सुप्रज्वलित सन् समग्रशास्त्रे व्याप्नोति। २- द्वितीयोऽधिकारस्तावत् अनुवर्त्तनरुप य चकार। रज्वा अयसा वा वद्धं काष्ठमनुकृष्यते। ३- अन्तिमस्तावत् स्वरितचिह्नेन वोध्यते यदा अधिकृत हर स्थाने निर्दिष्टमुच्चारणं न विधाय स्वरित चिह्नद्वारा यावदपेक्षितम् तावत् प्रत्येकस्मिन् सूत्रे उपस्तिष्ठति।

यदि सूत्रामिदं नियमार्थं भवति, तर्हि यत्र एका षष्ठी विविधविशेष्यसहितं सम्बन्धितं तत्र कार्य्यं न सिद्धयति। यथा- अङ्गस्य, हल, अण, सम्प्रसारणस्य इतिऽत्र षष्ठी स्थान द्वारा अङ्गमपि विशेष्यं भवति। हल् अपि विशेषणम्। अण् संप्रसारणमपि विशेष्यं भवति। सर्वेषां स्थानषष्ठी जायमाने हल सूत्रार्थ न सिद्धयति। नियमकरणे अस्माकं समीहा एकया षष्ठया अनेकषष्ठी कर्त्तुं शक्यते, यथा देवदत्तस्य पुत्र-अत्र जन्यजनक: सम्बन्ध:। देवदत्तस्य पाणि- अत्र अवयवावयवी सम्बन्ध। देवदत्तस्य कम्बल- स्वरस्वामिसम्बन्ध वोध्यते। अत सूत्रं न कर्त्तव्यमिति आक्षेपभाष्यमुपस्थापितम्।

यदि उच्चते नियमसूत्रं विना यावन्तो षष्ठयर्था सन्ति, तावन्तो षष्ठी उच्चारणद्वारा प्राप्नुवन्ति। अत सूत्रंबिना तत्र किं समाधानम्? अस्या शंकायासमाधानावसरे उच्यते यत्- न कश्चित् दोष:। यद्यपि लोके वहव: सम्बन्धा विद्यन्ते, यथा-आर्था:- धनद्वारा जायमाना: स्बामी भृत्यादि सम्बन्धा: एवंच यौना:-योनी समुद्भुता: पिता पुत्रादय:। मौखा:- मुखे जायमाना: गुरुशिष्यादय। स्त्रौवा:- स्त्रुवद्वारा पुरुहितयजमानादय वहव सम्बन्धा सन्ति। अत शब्दस्य शब्देन सहिंत स्थानसम्बन्धो विद्यते। अत सूत्रं विनाऽपि स्वत स्थानरुपा सम्बन्ध वोद्धुं शक्यते। यत व्याख्यानतो विशोषप्रतिपत्तिर्नहिसन्देहादलक्षणम्-इति नियमात् अस्तेर्भु इत्यत्र सुत्र स्थानरुप अर्थ ग्रहणीय। अत सूत्रं कर्त्तब्यं न वा इति शंकायां जातायाम्- विशिष्टा वा षष्ठी स्थाने योगा- समाधानपरक वार्त्तिकेन उच्यते-षष्टयन्तं स्थानेन यथा युज्यते यत षष्ठयुज्जारिता इति वचनानुरोधेन पाद पत्- इत्यत्र पाद शब्दस्य पदादेशो निर्दुष्ट इति। अत: सुत्रस्यास्य प्रयोजनं भगवता भाष्यकारेण याथार्थ्यन प्रपंचितमिति दिक्।

**उपसंहार:**

"षष्ठी स्थानेयोगा" (१-१-४१) इति सूत्रव्याख्यानवसरे सर्वोदौ भाष्ये "स्थानेयोगा शव्दार्थनिरुपणम्" समुपन्यस्तम्। आदौ आक्षेपभाष्ये-किमिदम्-स्थानेयोगेति? इति सन्दर्भे समाधानभाष्ये स्थाने योगोऽस्या: स्थानेन योगोऽस्या: वा इति विग्रहे निपातनात् सप्तम्या उलुकि तृतीयान्तसमासे विभक्तिलोपे निपातनात् एत्वे च कृते स्थानेयोगा इति जायते। तत्र सूत्रप्रयोजनप्रतिपादक आक्षेप भाष्यम्-किमर्थम् पुनरिदमुच्यते?इति प्रसङ्गें उच्यते- व्यख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम्- इति परिभाषया एव इष्टसिद्धौ सूत्रारम्भस्यातिप्रसङ्ग इति प्रश्न:। तत्र समाधानवार्त्तिकं यथा- षष्ठया स्थानेयोगबचनं नियमार्थम्। अस्य अभिप्रायस्तु इत्थं यत् षष्ठीदण्डकग्रन्थपाठ श्रयणात् एकशतं षष्ठयर्था: यावन्तो वा ते सर्वे षष्टयामुच्चारितायां प्राप्नुवन्ति। परन्तु व्याकरणे या षष्ठी सा स्थानेयोगा एव इति नियमार्थं सुत्रस्य प्रयोजनं विद्यते।

पुन: सूत्रप्रयोजनव्याख्यानावसरे अवयवषष्ठयादिषु स्थानसम्बन्धप्राप्त्यर्थं अवयवषष्ठयादिष्वतिप्रसङ्ग: शासो गोह इति आक्षेपवार्त्तिकम्, अवयवषष्ठयादिषु असन्देहत्वात् स्थानयोगनियमस्य अप्राप्तिप्रदर्शनाय अवयवषष्ठयादिनां चाऽप्राप्रियोगस्यासन्दिग्धत्वात् इति आक्षेपवाधकसमाधानवार्तिकं तथा किमपिलिंग संकेतयुक्ताषष्ठीमेव स्थानेयोगा निर्वचनाय अधिकारत्रयं च प्रतिपादनाय विशिष्टा वा षष्ठी स्थानेयोगा इति आक्षेपवाधवकवार्त्तिकम् समुपस्थाय समाधानभाष्ये उच्चते- षष्ठयन्तं स्थानेन यथा युज्यते यत: षष्ठयुच्चारिता इति वचनसामर्थ्यात् "पाद:पत्" इत्यादौ पादन्यस्य अङ्गस्य यो अवयव: पाद् शब्द: सूत्रे षष्ठया निर्दिष्ट: तस्य पत् शब्द: आदेशो भवति, न तु प्रतीयमानस्यपादन्तस्य।

तत्र "निर्दिश्यमानस्यदेशा:" भवन्ति इति परिभाषा न कर्त्तव्या भवति इति भाष्यसिद्धान्त:। यत: "येन विधिस्तदन्तस्य" "यदागमास्तद्गुणीभुतास्तदग्रहणेन गृह्यन्ते" इत्युभयवोधितस्थानिनो: "अनेकाल् शित्सर्वस्य"- इत्यत्र सर्वपदग्रहणात् सुपदो निर्जरसौ इत्याद्यसिद्धि: स्यात्, परन्तु पाणिनिसूत्रविहितस्थान्युच्चारणसामर्थ्यात् षष्ठी षष्ठयन्तमेब गृह्णाति तेन न कश्चिदतिप्रसङ्ग आपद्येत इति।

**सहायक ग्रन्थसूची**

१. अष्टाध्यायी, पाणिनी, चौखम्वा सूरभारती प्रकाशन, वारणासी।

२. वाक्यपद्वीयम्, भर्त्तृहरि, व्याख्याकार: वामदेव आचार्य, कृष्णदास एकाडेमी,वारणासी १९९७।

३. महाभाष्यम्, पतञ्जली, व्याख्याकार- चारुदेवशास्त्री, चौखम्वा संस्कृत सिरिज, वारणासी-१९७२।

४. परिभाषेन्दुशेखर, विश्वनाथमिश्र, चौखम्वासुरभारती, वारणासी, २००५।